No. २०४६-घ

Title १-: विष्णुधर्मोत्तरे अपराजितास्तोत्रम्
२-: भैरवाष्टकम्

Author २-: काशीनाथः

पत्र (3)

Extent १+२=३ Age
(१)-(२)

Subject पुराणम् तृ.कां.[illegible]। तन्त्रम्
(१) (२)

क विष्णुधर्मोत्तरे अपराजितास्तोत्रम्

ख भैरवाष्टकस्य पूजाविधिः स्तोत्रं च

१०४५

पत्राणि ३

श्रीगणेशायनमः ओं अपराजितास्तोत्रमंत्रस्य श्रीवेदव्यासऋषिः अनुष्टुप्छं
दः क्लींबीजं हंशक्तिः ममसर्वाभिष्टसिध्यर्थे जपेपाठेविनियोगः मार्कंडेयौवा
च शृणुध्वंमुनयः सर्वेसर्वकामार्थसिद्धिदां असिद्धसाधिनीदेवीवैष्णवी
मपराजितां ॐनमोभगवतेवासुदेवाय ॐनमोस्त्वनंतायसहस्रशीर्षायक्षी
रोदार्णवशायिने शेषभोगपर्यंकाय गरुडवाहनाय अजायअजितायअपरा
जिताय पीतवाससेवासुदेवसंकर्षणप्रद्युम्नअनिरुद्धायशेषमत्स्यकूर्मवरा
त्रिविक्रम हनरसिंघवामनरामरामरामवरप्रदायनमोस्तुतेस्वाहा असुरदैत्यदानवय
क्षराक्षसभूतप्रेतपिशाचकिंनरकूष्मांडसिद्धयोगिनीडाकिनीशाकिनीस्कंद
पुरोगानग्रहान्नक्षत्रग्रहांश्चान्यान् हन२पच२मथ२विध्वंसय२विद्रावय२
चूर्णय२त्रासय२खेदय२ चक्रेणवज्रेणशूलेनगदयामुशलेनहलेनभस्मी
कुरु२स्वाहा ॐसहस्रबाहोसहस्रप्रहरणायुधजय२विजय२अजितअमिता
पराजितअप्रतिहतसहस्रनेत्र ज्वल२प्रज्वल२विश्वरूपबहुरूपमधुसूदनम
हावराह च्युतमहापुरुषपुरुषोत्तमपद्मनाभवैकुंठानिरुद्धनारायणगोविंद
केशव दामोदरहृषीकेशसर्वासुरोत्सादनसर्वमंत्रप्रभंजनसर्वदेवनमस्कृतसर्वबं
व धनविमोचन सर्वशत्रुशंकरसर्वाहितप्रमर्दनसर्वायुधप्रमर्दनसर्वग्रहनिवा नं
रणसर्वरोगप्रशमनसर्वपापविनाशनजनार्दननमोस्तुतेस्वाहा यइमामपरा

सर्वज्वरविनाशन२

जितां परमवैष्णवीं पठति सिद्धां पठति सिद्धां जपति २ सीद्धां स्मरति २ सिद्धां महाविद्यां
पठति जपति २ स्मरति स्मरति धारयति कीर्तयति वा न तस्याग्निवायुवज्रोपलाश
निभयं न वर्षभयं न समुद्रभयं न राजभयं न ग्रहभयं न चौरभयं वा न भवेत् क्वचि
द्रात्र्यंधकारस्त्रीराजकुलविषोपविषमगरलवशीकरणविद्वेषणोच्चाटनवं
धवंधनभयं स्थानस्थापदभयं वा न भवेत् एतैर्मन्त्रैरुदाहृतैः सिद्धैः संसिद्धपूजनैः
स्तवर्थां नमस्ते स्तवनघे भयेऽमितेऽजितेऽपराजिते पठति सिद्धे पठति जपति सिद्धे
जपति सिद्धे स्मरति सिद्धे महाविद्ये एकानांशे उमे ध्रुवे अरुन्धति सावित्री गायत्री जा
तवेदसि मानस्तोके सरस्वति रमणि रामणि धरणि धारणि सौदामिनि अदिति
दिति विनते गौरि गान्धारि मातंगी कृष्णे यशोदे सत्यवादिनि ब्रह्मवादिनि कालीक
पालिनि करालनेत्रे सद्योपयाचनकरि जलगतं स्थलगतमंतरिक्षगतं वा मां रक्ष २
सर्वभूतसर्वोपद्रवेभ्यः स्वाहा यस्याः प्रणश्यते पुष्पं गर्भो वा पतते यदि म्रियंते बा
लका यस्याः काकवंध्या च या भवेत् धारयेद्यद् इमां विद्यामेतैर्दोषैर्न लिप्यते रणे
राजकुले द्यूते नित्यं तस्य जयो भवेत् भूर्जपत्रे त्विमां विद्यां लिखित्वा धारयेद्यदि
एतैर्दोषैर्न लिप्यते सुभगा पुत्रिणी भवेत् रात्रौ धारयते ह्येषा समरे कांडवारिणि
गुल्मभूतादिरोगाणि क्षिप्रं नाशयते व्यथां शिरोरोगज्वराणां च नाशिनी सर्वदे ८
हिनां तद्यथा एकाहिक द्व्याहिक त्र्याहिक चातुर्थिकार्द्धमासिका द्वैमासिका त्रैमा

मासिका

श्रीगणेशायनमः ॥ श्रीभैरवायनमः ॐ यारा॥ णस्यांभैरवोदेवः संसारभयनाशनं
अनेकजन्मकृतंपापंस्मरणेनविनश्यति ॥१॥ ॐ अस्यश्रीभैरवाष्टकस्तोत्रमंत्रस्य।
श्रीईश्वरऋषिः ॥ अनुष्टुप्छंदः। श्रीभैरवोदेवता ॥ ॐ ममसर्वकामनासिध्यर्थे जपे।
पाठेविनियोगः ॥ अथकरन्यासः ॥ ॐ कं अंगुष्ठाभ्यांनमः ॥ ॐ हं तर्जनीभ्यान्नमः ॥ ॐ
खंमध्यमाभ्यान्नमः ॥ ॐ सं अनामिकाभ्यान्नमः ॥ ॐ गं कनिष्ठिकाभ्यान्नमः ॥ ॐ क्षं
करतलकरपृष्ठाभ्यान्नमः ॥ अथहृदयादिन्यासः। ॐ कं हृदयायनमः ॥ ॐ हं शिर
सेस्वाहा ॥ ॐ खं शिखायैवौषट् ॥ ॐ सं कवचायहुं ॥ ॐ गं नेत्रत्रयायवौषट् ॥ ओं क्षं।
अस्त्रायफट् ॥ ककारंहृदयंन्यस्य हकारंनासिकेतथा। खकारंतुललाटेच सकारं
मुखमध्यतः। गकारंरसनान्यस्य ॥ क्षकारंसर्वांगेविन्यसेत् ॥ इतिअंगन्यासः ॥ अ
थध्यानम् ॥ ॐ करकलितकपालः कुंडलीदंडपाणिः तरुणतिमिरनीलंव्यालय।
ज्ञोपवीति ॥ क्रतुसमयसपर्य्याविघ्नविच्छेदहेतुर्जयतिबटुकनाथः सिद्धिदः साध
कानाम् ॥१॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपमः। भैरवायनमस्तुभ्यमनुज्ञां
दातुमर्हसि ॥२॥ ॐ पूर्वदिशि असितांगभैरवायनमः ॥ प्राच्यांममरक्षरक्षरक्षका
लकंटकान्भक्षभक्षभक्ष आवाहयाम्यहं ॥ मंत्रतिष्ठतिष्ठतिष्ठहुंफट्स्वाहा ॥ ॐ आ
ग्नेयांरुरुभैरवायनमः ॥ अग्निदिशायांममरक्ष ३ कालकंटकाभक्ष ३ आवाहयाम्य
हं ॥ मंत्रतिष्ठ ३ हुंफट्स्वाहा ॥ ॐ दक्षिणदिशाचंडभैरवायनमः ॥ दक्षिणदिशायांमम १

१ सिका चातुर्मासिक षण्मासिक वातिक पैत्तिक श्लैष्मिक सन्निपातिक सततंज्वररवि
षमज्वर त्रिदशमेश्वर ग्रहनक्षत्रदोषान् हर हर कालीसर सर गौरीधमधम विद्ये आले
माले ताले माले गंधे पच २ विद्ये मथ २ विद्ये नाशय २ पापं हर २ दुःस्वप्नविनाशिनि
एतनि संध्ये दुंदुभिनादे मानसवेगे शंखिनि चक्रिणि वज्रिणि शूलिनि अपमृत्यु
विनाशिनी विश्वेश्वरि द्राविडि द्राविडि केशवदयिते पशुपतिसहिते दुखदुरते भा
ममर्द्दिनि दुंदुभि दमनि शाबरी किराति मातंगि ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः श्रां श्रीं श्रूं श्रैं श्रौं
ॐ सौं श्रः तुरु तुरु स्वाहा ये मा हिंसंति प्रत्यक्षं परोक्षं वा तान् सर्वान् दम २ मर्दय २ पा
तय २ शोषय २ उत्सादय २ ब्रह्माणि माहेश्वरी वाराही वैष्णवी वैनायकी कौमारि
नारसिंहि ऐन्द्रि चान्द्रि आग्नेयी चंडी चामुंडि वारुणि वायव्ये रक्ष २ प्रचंडविद्ये इं
द्रोपेंद्रभगिनि जये विजये शांति पुष्टि तुष्टि धृति विवर्द्धिनि कामांकुशे कामदुघे
सर्वकामफलप्रदे सर्वभूतेषु मां मां मां प्रियं कुरु २ स्वाहा ॐ आकर्षिणि आवे
शिनि ज्वालामालिनि रमणि रामणि तपनी तापनि धर लीं मदोन्मादिनि शोषणी सं धारणि
मोहिनि महानीले नीलपताकिनि महागौरी महाप्रिये महाचांद्रि महासौरि महामायूरी
आदित्यरश्मि जाह्नवी यमघंटे किलि किलि चिंतामणि सुरभि सुरोत्पन्ने सर्वकामदु
घे यथा भिलिषितं कार्यं तन्मे सिध्यतु स्वाहा ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वा
हा ॐ भूर्भुवः स्वः स्वाहा ॐ यत एवागतं पापं तत्रैव प्रतिगच्छतु स्वाहा ॐ बले बले म ६
हाबले असिद्धसाधिनि स्वाहा इति विष्णुधर्मोत्तरे तृतीयकांडे त्रैलोक्यविजयाऽपराजि
ता समाप्ता शुभं भवतु

[illegible]
रक्ष ३ ॥ कालकंटकान्भक्ष ३ ॥ आवाहयाम्यहं ॥ मंत्रतिष्ठ ३ हुं फट् स्वाहा ॐ नैरृत्यदि
शा क्रोधभैरवाय नमः ॥ नैरृत्यदिशायां मम रक्ष ३ ॥ कालकंटकान्भक्ष ३ ॥ आवाहयाम्य
हं ॥ मंत्रतिष्ठ ३ ॥ हुं फट् स्वाहा ॥ ॐ प्रतीच्यादिशायां उन्मत्तभैरवाय नमः ॥ प्रतीच्यादिशां
मम रक्ष ३ कालकंटकान्भक्ष ३ ॥ आवाहयाम्यहं ॥ मंत्रतिष्ठ ३ हुं फट् स्वाहा ॥ ॐ वायव्य
दिशा कपालभैरवाय नमः ॥ वायव्यदिशायां मम रक्ष ३ ॥ कालकंटकान्भक्ष ३ ॥ आवाह
याम्यहं मंत्रतिष्ठ ३ हुं फट् स्वाहा ॥ ॐ उदीच्यादिशा [illegible] भीषणभैरवाय नमः ॥ उदीच्य
दिशायां मम रक्ष ३ ॥ कालकंटकान्भक्ष ३ ॥ आवाहयाम्यहं ॥ मंत्रतिष्ठ ३ ॥ हुं फट् स्वाहा ॥ ॐ
ईशान्यदिशा [illegible] सिंहभैरवाय नमः ॥ ईशान्यदिशायां मम रक्ष ३ ॥ कालकंटकान्भक्ष ३ ॥
आवाहयाम्यहं ॥ मंत्रतिष्ठ ३ हुं फट् स्वाहा ॥ ॐ ह्रीं ह्रीं ह्रीं नमो भगवते भैरवाय नमः इति
मंत्रमष्टोत्तरशतं जपित्वा ॥ ॐ अस्य श्रीभैरवस्तोत्रमंत्रस्य ईश्वर ऋषिः अनुष्टु
प्छंदः श्रीभैरवो देवता ॥ मम चतुर्वर्गसिद्ध्यर्थे जपे पाठे विनियोगः ॥ पूर्ववन्न्या
सं कुर्यात् ॐ श्रीगुरवे नमः ॥ ॐ यं यं यं यक्षरूपं दशादिशावसितं भूमिकंपाय
मानं सं सं सं संहारमूर्त्तिं शिरकपिलजटाशेखरं चंद्रबिंबं ॥ दं दं दं दीर्घकायं विकृत
नखमुखं चोर्ध्वरोमं करालं ॥ पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालं ॥ १ ॥ रं रं
रं रक्तवर्णं कटिकटिततनुं तीक्ष्णदंष्ट्राकरालं ॥ घं घं घं घोषघोषं घघघघघटितं घ
र्घुं र्घुं र्घुं र्घुमवर्णं स्फुरविकृतमुखं भास्करं भीमरूपं रं रं रं रुंडमालं रुधिरतनुमयं ताम्र
नेत्रं करालं ॥ नं नं नं नग्नरूपं प्रणमत सततं भैरवं क्षेत्रपालं ॥ २ ॥

वंवंवंवायुवेगं ऋषिघ्रनरतरं ब्रह्मपारं परंतं खंखंखंखंखड्गहस्तं त्रिभुवननिलयं भास्क
रं भीमरूपं चंचंचंचंचलंतं चलगतिचलितं भूतचक्रं चचालं मंमंमंमायारूपं प्र॰
४ शंशंशंशंखहस्तं शशिकरधवलं मोक्षसंपूर्णतेजं मंमंमंमहद्भूतकुलमकु
लकुलं मंत्रमूर्तिं सुनित्यं भंभंभंभूतनाथं किलिकिलिकिलितं गल्हगल्हातिलंसं
अंअंअंअंतरिक्षं प्रणमत॰ ५ खंखंखंखंखड्गहस्तं विषयामृतमयं कालकालं कराल
क्षंक्षंक्षंक्षिप्रवेगं दहदहदहनं सप्तद्वीपप्रमाणं हुंहुंहुंहुंकारनादं प्रकटितगहनं ग
र्जितं भूमिकंपं बंबंबंबालकीलाप्रणवत॰ ६ संसंसंसिद्धियोगं सकलगुणमयं
देवदेवं प्रसन्नं पंपंपंपद्मनाभं हरिहरभुवनं चंद्रसूर्याग्निनेत्रं ऐंऐंऐंऐश्वर्यना
थं सततभयहरं सर्वदेवस्वरूपं रौंरौंरौंरौद्ररूपं प्रण॰ ७ हंहंहंहंसरूपं हसति
कहकहं मुक्तिदं दीर्घहासं यंयंयंयक्षरूपं शिरकपलजटाबंधबंधाग्रहस्तं टं
टंटंटंकारवाणं त्रिदशदलदलं कामदर्पापहारं भुंभुंभुंभूतनाथं प्रणमतस
ततं भैरवं क्षेत्रपालं ८ भैरवाष्टकमिदं पुण्यं षण्मासं यः पठेन्नरः स याति प
रमं स्थानं यत्र देवो महेश्वरः ९ इति श्रीकाशीनाथकृतो श्रीभैरवाष्टकं संपूर्णं॥
शुभं भवतु श्रीरस्तु श्रीसांबसदाशिवार्पणमस्तु नारायण हरि वासुदेव॥

2.